# 2021

## SANSKRIT — HONOURS

**Paper : CC-4**

**(Self Management in the Gītā)**

**Full Marks : 65**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

### Section - A

**Unit : I**

**(Marks : 30)**

1. अधोलिखितेषु ***दश*** प्रश्नाः समाधेयाः (***संस्कृतभाषया देवनागरलिप्या च***)। 2×10

(a) इन्द्रियाणि कतिविधानि सन्ति? तेषां नामानि उल्लिख्यन्ताम्।

(b) 'जीवलोके जीवभूतः सनातनः' – जीवलोके जीवभूतः कस्य कीदृशश्च अंशः?

(c) जीवात्मा कथमेव शब्दादीन् विषयान् उपसेवते?

(d) 'मनसस्तु परा बुद्धिर्यो बुद्धेः परंतस्तु सः' – अत्र 'सः' इति पदेन कः बोध्यते? तस्य स्वरूपं कीदृशम्?

(e) भगवतः अष्टधा भिन्नायाः प्रकृतेः नामानि उल्लिख्यन्ताम्।

(f) प्रकृतिः कतिविधा? काश्च ताः?

(g) गुणाः कतिविधाः? गुणाः कस्मात् समुद्भवन्ति?

(h) सत्यगुणस्य वैशिष्ट्यं कीदृशम्?

(i) तमोगुणस्य प्रभावः कीदृशः भवति?

(j) किं प्रमादालस्यनिद्राभिः देहिनं निबध्नाति?

(k) रजोगुणात् के जायन्ते?

(l) ज्ञानेन्द्रियपञ्चकस्य विषयाः के?

2. अधोलिखितेषु यथेच्छ***मेकस्य*** संस्कृतभाषया ***देवनागरलिप्या*** च व्याख्या कार्या। 6×1

(a) लोभः <u>प्रवृत्तिरारम्भः</u> कर्मणामशमः स्पृहा।
<u>रजस्येतानि</u> <u>जायन्ते</u> विवृद्धे <u>भरतर्षभ</u>।।

(b) तत्र सत्त्वं निर्मलत्वात् प्रकाशकमनामयम्।
<u>सुखसङ्गेन</u> <u>बध्नाति</u> ज्ञानसंङ्गेन चानघ।।

**3.** (a) विग्रहवाक्यं प्रदाय संस्कृतभाषया देवनागरीलिप्या च समासनाम लिख्यताम् (कस्यचन ***एकस्य***)। 2×1

(i) भरतर्षभ 2(a) प्रश्ने।

(ii) सुखसङ्गेन 2(b) प्रश्ने।

(b) कस्यचन***नैकस्य*** सन्धिविच्छेदः कार्यः (संस्कृतभाषया देवनागरीलिप्या च)। 1×1

(i) रजस्येतानि 2(a) प्रश्ने।

(ii) प्रवृत्तिरारम्भः 2(a) प्रश्ने।

(c) कस्यचि***देकस्य*** व्युत्पत्तिः निर्णेया। 1×1

(i) जायन्ते 2(a) प्रश्ने।

(ii) बध्नाति 2(b) प्रश्ने।

**Section - B**

**Unit : III**
**(Marks : 15)**

**4.** अधोलिखितयोः प्रश्नयोः कस्यचित् ***एकस्य*** उत्तरं देयम्। 10

(a) श्रद्धावान् कथं ज्ञानं लभते? श्रीमद्भगवद्गीतायां ज्ञानयोगे वर्णितं ज्ञानतत्त्वस्वरूपं लेखनीयम्। 2+8

(b) बुद्धिः कतिविधा? कथं विषयासक्तेः निवृत्तिः भवति इति संक्षिप्ततया आलोच्यताम्। 2+8

**5.** अधोलिखितयोः कस्यचि***देकस्य*** आङ्गलभाषया वङ्गभाषया वा अनुवादः कार्यः। 5×1

(a) विषया विनिवर्तन्ते निराहारस्य देहिनः।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते॥

(b) योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते॥

**Section - C**

**Unit : I**
**(Marks : 20)**

**6.** अधोदत्तेषु विषय***द्वयस्य*** संक्षिप्ततया टीका लेखनीया। 5×2

अक्षरब्रह्मयोगः, निष्कामकर्मयोगः, राजविद्याराजगुह्ययोगः।

**7.** अधोलिखितयोः प्रश्नयोः ***एकतरस्य*** उत्तरं प्रदेयम्। 10

(a) 'मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः'।

—कः कं प्रति एवमुपदिष्टवान्? कथं श्रीभगवान् प्राप्तुं शक्यते? भगवति मनः बुद्धिं च समर्प्य कीदृशम् आचरणं भक्तः कुर्यात्? 2+4+4

(b) 'कर्मण्येवाधिकारस्ते'

—कः कं प्रति एवमुपदिष्टवान्? कथं कर्मणि अधिकारः वर्तते? 2+8

---